श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री करुणाकराचार्यस्वामिना विरचिता

# ॥ श्रीनङ्गैनल्लूर् हयग्रीवतोटकस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनङ्गैनल्लूर् हयग्रीवतोटकस्तुतिः ॥

श्रीवत्सवंशकलशोदधिकौस्तुभस्य
श्रीवासराघवगुरोस्तनयं ततश्च ।
विद्या अवाप्य विबुधोत्तमतां दधानं
कुर्वे सदा हृदि गुरुं करुणाकराख्यम् ॥

मधुकैटभमर्दनदक्ष ! विभो ! हयवक्त्र ! रमादयितेति जपन् ।
सकलं किल कालमहं भविता विपदः कथमत्र भवेयुरहो ॥ 1 ॥

रमणीसुपुरे कृतवासमहं तुरगं वदने सततं कलये ।
यमपत्तनवासकथा न हि मे विपदामपदं भविताऽस्मि दृढम् ॥ 2 ॥

रमणीसुपुराधिपवाजिमुखे कमलासहिते मम भारमहम् ।
सकलं विनिवेश्य मुदामभवं ननु वासमहीतलमत्र सदा ॥ 3 ॥

जगतां परिपालनसद्व्रतवान् वदने तुरगो वरदो भगवान् ।
तमहं सततं मनसा वचसा प्रणतो भयमत्र न मे भविता ॥ 4 ॥

भगवन् ! मधुकैटभगर्वहरागमदोऽसि विधेरयि ! पालय माम् ।
इति ते सविधे कथयन् सततं करुणां तव सत्यमशीय विभो ! ॥ 5 ॥

ध्रुवबालकपोलकृताब्ज हरे ! कवने पटुतां त्वमदा झटिति ।
मयि चाऽपि तथा करुणां कुरु हे रमणीसुपुरे वदने तुरग ! ॥ 6 ॥

अहिराजपुरे तपसा मुदितः कवितार्किककेसरितां प्रददौ ।
स भवान् भगवन् ! तव साम्यमयं रमणीसुपुरे भजते गुरुराट् ॥ 7 ॥

स्पृहये न हि तादृशमत्र पदं त्वपि तस्य गिरामथ भावधियम्।
वितरेर्मम येन भवत्पदयोः भगवन्! भजनं सुलभं भवितृ॥ **8**॥

यतिराडभवत्तव भक्तवरो मतिदोऽस्य कथाहवसङ्ग्जये।
त्वमभूस्स च शारदयाऽभिनुतो वितरेर्मम भावमथास्य गिराम्॥ **9**॥

गुणिनां गणने बहुदूरगतः प्रथमस्तव दुस्सहपापकृताम्।
अपि मय्यथ ते करुणा प्रवहेदिति मे वदनेऽश्व! मतिस्सुदृढा॥ **10**॥

करुणाकरसत्कविसूनुकृतं त्वपि नीरसमस्ति मुदे कवनम्।
करुणाकर! तुङ्ग! तुरङ्ग! मुखे करुणां कुरु तन्मयि पापिनि हे!॥ **11**॥

॥ इति श्रीनङ्गैनल्लूर् हयग्रीवतोटकस्तुतिः समाप्ता॥